१३
२२

९३
22

ग्रन्थ

ग्रन्थनाम:-	"मयूखमालिका" (शास्त्रदीपिकाव्याख्या)	
कर्तृनाम:-	सोमनाथः	
विषयः:-	पूर्वमीमांसा	

2252

Mayukhamalika.
Somanatha
Purvameemamsa

सोम "मयूखमालिका"

गवाक्यप्रकरणस्थानसमाख्यानैः शेषविनियोगलक्षणमुक्तमिति भाष्येऽस्त्याद्युक्त्याश्रुत्यादिव्यतिरिक्तं शे
षत्वे प्रमाणांतरमस्तीत्यवगमादुपादानाख्यप्रमाणगम्यशेषप्रयुक्त्यधिकारोऽत्यसाव्येव चतुष्टयमस्याध्यायार्थ इति
वदंति तं मतमुत्थापयति तत्पुनरिति भाष्येऽस्त्यादिकीर्तनं विवक्षार्थं चित्स्याद्युपपन्नं न प्रमाणांतरसद्भावेन गमकं वि
वक्षार्थे विकल्पे चपरीक्ष्यं गौकार्यमित्यभिप्रायेण प्रतिवदिमुद्घाटयति अपि वेति शेषकर्तृत्वस्य विवक्षितत्वेऽन्वमाह उद्देमे
वेति उपादानप्रमाणनिरासस्य न्यायरत्नमालादौ प्रपंचनादिह दिङ्मात्रं प्रदर्शितं तदेव यस्मिन्प्रीतिः पुरुष
स्य तस्य लिप्सार्थलक्षणाविभक्तत्वात् ननु लक्षणाभिधानं प्रयुक्त्यनुगुणमित्यत आह वक्ष्यमाणयोरिति क
रिष्यमाणः कर्तव्यार्थः पुरुषार्थविचारोपयोगित्वात् नासंगतमिति भावः यस्मिन्कृते प्रीतिः स पुरुषार्थ इति
सोऽत्र लक्षणमनुपपन्नं तत्र प्रीतिशब्देन खाविषयमात्रोक्तौ कर्तव्यार्थातिव्याप्तेः स्वारसिके खाविषयोक्तौ पश्वादि
फलकर्मण्यव्याप्तेः स~~स्विके खाविषयोक्तौ पश्वादिफलकर्मण्यव्याप्ते~~ अतः कर्तव्यार्थत्वमित्रं घटितमेव लक्षणं वाच्यमि
त्याशयेन सूत्रानुपात्तमपि कर्तव्यार्थलक्षणं प्रथममाह यदिति गोदोहनादेर्वस्तुतः कर्तृत्वप्रकारकत्वेऽपि कर्तृ
प्रकारोद्देशेन विधानाभावेन भावनाकर्मभावपरिग्रहणार्थत्वेन विधानाभावान्न कर्तव्यार्थत्वं एवमाधानाध्यय
नयोरपि अश्रमार्थज्ञानमात्रार्थत्वेन विधीयमानक्रत्वपूर्वसाधनोद्देशेन विधानाभावेनावहननादेरिव कर्थमा

शास्त्रदीपिकाव्याख्या ।
सोम[illegible]प्रणीता ।

ऽङ्गभेदर्जनात्तत्र कर्मभेदस्सिद्धार्थं फलस्यानुपादेयत्वमेव वक्तव्यं न त्वविधेयत्वमपि विधेयत्वेऽपि दर्शनादिवत्

सीम० ४ ४ वपरिपूर्णार्थत्वाभावात्तत्र कृतत्वार्थमिति भावः ननु कृतत्वार्थत्वान्यत्वं न पुरुषार्थत्वलक्षणमाधानाध्ययनयोरतिव्या
प्तेरितिशंकां निराकर्तुं कारणं फलं चेत्युक्तमर्थभावः शास्त्रानपेक्षेच्छाविषयभाव्यकभावनांशत्वे सति कृतत्वा
र्थभिन्नत्वं पुरुषार्थत्वलक्षणं विवक्षितमिति भावः नाधानाध्ययनयोरतिप्रसंगः तयोरग्न्यर्थत्वाज्ञानभाव्यक
भावनाकारणत्वेऽपि अग्नेरर्थत्वात्तस्य च आहवनीये जुहोतीत्यादिशास्त्राधीनेच्छाविषयत्वेन तदनपेक्षे
च्छाविषयत्वाभावेन तादृशभाव्यकभावनांशत्वाभावादिति सूत्रार्थस्तु यस्मिन्पदार्थे कृते पुरुषस्य प्रीति
स्वर्गादिलक्षणोपजायते तद्दर्शपूर्णमासादिः पुरुषार्थः यत्नस्तस्य लिप्सानुष्ठानमर्थलक्षणं पुरुषार्थ
भक्तलादिती संत १ स्य प्रीत्याख्यविशिष्टफलस्य यस्मिन्कृते प्रीतिर्भवतीति सूत्रे प्रसाददलभ्यत्वात्कृतलक्षणसूत्रानुगुणं पर्वोध्य स
विचारशास्त्रे लक्षणकथनं भ्रांनात्यंतसंगतमित्यनुशयानो भाष्यानुक्रममपि वर्णकान्तरमाह अथवेति
न च फलस्याविधेयत्वं द्वितीय एवोक्तमिति वाच्यमनुपादेयसमभिव्याहृतं सन्निधिः कर्मभेदकत्वोपमत्तेस्त
स्मादिहैव प्रयुक्तिविशेषसिद्ध्यर्थं तद्विचार्यमिति भावः फलांशस्य विधेयत्वाभावे चोदनागम्यत्वमेव न स्या
त् तस्मात्करोति कर्तव्यं तेषां कृत फलांशस्यापि विधेयत्वाद् शास्त्रय विशिष्टगोचरो विधिरित्याशंकावत्तत्फ एम०
लांशेऽपि प्रयोजकत्वं इति पूर्वपक्षमाह विधेयेति यथा ज्योतिष्टोमादेः स्वरूपेण लोकसिद्धस्यापि फलसाध ४

नत्वस्य विधिप्रमाणकत्वाच्चोदनागम्यत्वमेवं फलस्यापि तत्साध्यत्वस्यान्यतश्चानवगमाद्विधेयेकप्रमाणत
याचोदनागम्यत्वमुपपद्यते नचैतावता विधेयत्वापत्तिः नह्यज्ञातज्ञानेयत्नं विधिः किंत्वप्रवृत्तप्रवर्तनं तेन
यत्रप्रथमं प्रवृत्तिः पुरुषो विधिवशात्प्रवर्तते तद्विधेयं फले च प्रथममेव रागात्प्रवृत्तिः मन्नसिद्धं ज्ञाता
न हि फलमानसप्रवृत्तिरन्याकायवचनचेष्टारूपा प्रवृत्तिर्विध्यधीनापि संभवति विशिष्टरागाद्वरोपिच
विधिर्येद्विशेषणे प्रवृत्तिरन्यतो न लभ्यते तत्रैव प्रवर्तको नान्यत्रेति न फलस्य विधेयत्वमिति सिद्धांतमाह
रागत इति प्रयोजनं पूर्वपक्षे श्येनयागफलस्याभिचारस्य हिंसात्मकस्य विधेयत्वेन तत्र न हिंस्यादिति निषे
धाप्रवृत्तिः सिद्धांते तु तत्प्रवृत्तिरिति यस्मिन्स्वर्गादावनुभूयमाने पुरुषस्य प्रीतिस्तृप्तिर्भवति तस्य फ
लेष्वार्थलक्षणा स्वारसिकीतियावत्फलस्य प्रीत्या अविभागादिति एवं वा गोदोहनेनेति गावो यस्मिन्दु
ह्यन्ते तेनेत्यर्थः किमिति किं क्रतुपुरुषोभयार्थमुत केवलं पुरुषार्थमित्यर्थः फलरूपविशेषणोक्त
तु विधेरप्रयोजकत्वेपि गोदोहनरूपविशेषणे प्रयोजकत्वमस्त्विति प्रत्यवस्थानात्संगतिः पक्षेति पक्षा
त्तस्यैव धमात्रार्थत्वेपि प्रकृते कर्मसमभिव्याहारात्क्रत्वार्थकत्वमिति भावः क्रतूपकारकत्वादिति नचोप
कारकत्वलक्षणं शेषत्वं न भवतीति तत्रीयेनिराकाङ्क्षेण विधितएव तादर्थ्यस्यावक्तव्यत्वात् कथमुपकारक

सोम-४ त्वात् क्रत्वर्थत्वमुच्यत इति वाच्यं सत्यमिदं प्रकारकत्वे सर्वं यदार्थं माहित्वात् प्रयोगविधिना क्रतूपकारायगोदोहन
५ स्याप्यवश्यं विधेयतया क्रत्वर्थत्वोपपत्तेरिति पूर्वपक्षाभिमन्यत इति भावः भवेदेवं क्रत्वर्थत्वं यदि प्रयो
गविधिर्गोदोहनं विदध्यात् स तु पुरुषार्थे नैव गोदोहनेन प्रसंगात् क्रतूपकारसिद्धिं दृष्ट्वा स्वभावसिद्धत्वान्न
तत्र व्याप्रियते तेन स तु प्रयुक्तकारकत्वेन गोदोहनस्य क्रत्वर्थत्वमित्याशयेन सिद्धान्तमाह नैवमिति पुरुषा
र्थमेवेति ननु यथा हि षिषितिद्धिकामाय विघनं कुर्यात् स्रुग्भित्यान्नाद्यकामाय जुहुतिस्वर्गकामय इत्यनेन
वृष्ट्यादिफलार्थं यत् सौभरं न द भ्रेत्याद्यां हिंषादयो विधीयते न भासर्वेभ्यः कामेभ्य इत्यनेन दर्शपूर्णमा
सयोः पश्वर्थत्वस्यापि सद्भावात् पशुफलार्थं दर्शपूर्णमासप्रणयनानार्थतया गोदोहनविध्युपपत्तेः क्र
पमस्य पुरुषार्थत्वमिति चेन्नैवं तत्र हिंषादीनां फलाय विधीयमानानामाश्रयो न लभ्यते प्रकृतस्य सौभ
रस्याश्रयत्वायोग्यत्वाद्ग्रामस्य स्वाच निधनस्य प्रकृतत्वादित्याश्रित्य विधानात् संभवात् सौभरस्यानियमेन
हींषादिनिधनसंबंधस्याप्राप्तत्वेन तत्रियममात्रविधानेन लाघवाच्च तत्र वृष्ट्यादिसाधन सौभरंमितया
हींषादिविधानसंभवेपि प्रकृते प्रणयनस्याश्रयत्वाच्च क्रतुविलोपप्रसंगाद्वंगस्याप्यसामर्थ्यात्त्व हिर सोम॰
नुष्ठेयोग्यस्य प्रकृतत्वेन तदाश्रितस्य सात्ताफलार्थतया गोदोहनस्य विधिसंभवे पशुकामशब्दस्य ततसा ५
नमकं गत क्रतुरेव स्वपि स्वर्थं जीवनमात्रे द्रव्यविनियोगमनुमन्यते इतित स्कल क्रमत्वात्तुवाद इत्यर्थः अनुमान

यन दर्शपूर्णमासतन्त्रगणीमध्यगीकृत्य क्रत्वर्थतया विध्ययोगात् क्रतोश्चमसावरुद्धत्वया गोदोहनस्यार्थत्वात्प्र
प्रस्य विधाने गौरवाच्च फलाय गुणविधिर्वायमिति वैषम्यादिति भावः इमं विचारमध्याये संगमयति
इति फलेति इदं चापाततः गोदोहनादेः क्रत्वर्थत्वेपि क्रतुप्रयुक्त्यभावात् फलस्य पुरुषाभिलषितत्वे
न फलप्रयुक्तेः शीघ्रत्वपाफलप्रयुक्तिर्नैव क्रतूपकारसिद्ध्या क्रतोस्तत्प्रयुक्तौ उदासीनत्वात् एवं च
पूर्वोत्तरपक्षयोः फलप्रयुक्तमेव गोदोहनं न क्रतुप्रयुक्तमिति नातीवायं विरोचात्र संगत इति इत्थं वी
मिर्ववीनन्तु न तावदत्र द्रव्यार्जनमुदाहरणं तस्याविहितत्वेन विध्येकगम्यक्रत्वर्थत्वायोग्यत्वात् न चापित
त्रियमः वस्य मानादो प्रदुष्टत्वादिति युक्तमिति किमिहेति द्रव्यार्जनस्याविहितत्वेपि तद्रूपायस्य प्रतिग्र
हादेर्विहितत्वेन तद्विधेश्च प्रतिग्रहाद्यर्जितद्रव्येणैव क्रतोरुपकुर्यादित्येवमर्थे पर्यवसानात्तदा द्रव्या
त्व र्जनस्य क्रत्वर्थयोग्यत्वं संभवतीत्याशयेनोत्तरमाह द्रव्यार्जनमिति अर्जनशब्दस्य कारणसाधनत्वभ्रमं
व्युदस्यति द्रव्यस्येति इत पुरुषार्थेति अत्र सिद्धान्ते पुरुषार्थत्वेन पुरुषं प्रति प्रधानत्वेन लक्षणाप्रवृत्तत्वं संभ
वति तस्य विध्येकसमधिगम्यत्वेनाविहितस्यार्जनस्य तदसंभवात् तस्मात् क्रत्वर्थत्वाभाव एव सिद्धान्त
कोटेरर्थो द्रष्टव्यः गोदोहनवदिह पुरुषार्थत्वावेदकश्रुत्यभावादप्रत्यक्षं क्रत्वर्थत्वमिति प्रत्यवस्थानदृ

सोम४ गतिः ननु नियमस्य पुरुषार्थत्वेनाप्यर्थवत्त्वसंभवतीति शंकां निराकुर्वन्नस्तोकं व्याचष्टे प्रतिग्रहेति आर्जि
६ तोद्देशेन विधीयमानस्य नियमस्यार्जनमतंत्रीकृत्य स्वातंत्र्येण पुरुषार्थत्वं न संभवतीति भावः नियमस्यार्जनांग
त्वमात्रेण कथमर्जनस्य क्रत्वर्थमित्यत आह स्वरूपेति ननु नियमाभावे यथाक्रतु निष्पत्तिसंभवान्नत्राप्यानर्थक्यं तुल्य
मित्याशंक्य भवेदेवं क्रतुस्वरूपार्थमित्यत आह लोके क्रत्वपूर्वार्थत्वे तु नायं दोष इत्याशयेनाह तथा सतीति अदृष्टत्वादि
ति अदृष्टत्वादेव तत्तत्प्रतिग्रहादिव्रत्नियमं विना निष्पत्तिरेवं सैव श्रवणात् क्रत्वर्थस्यैवार्जनस्य तन्नियमविधावुद्देश्य
त्वमित्यर्थः यदि द्रव्यार्जनं क्रतुप्रकरणे पठितं स्यात्तदा व्रीहीन्प्रोक्षतीत्यादौ व्रीहिमात्रस्योद्देश्यत्वश्रवणेपि व्रीहिभि
र्यजेतेति प्रकृतार्थानां व्रीहीणामुद्देश्यत्ववत् क्रत्वर्थस्यैवोद्देश्यत्वं स्यान्न च तदस्तीत्याशयेनाह प्रकरणेति सं
निधिपरिग्रहार्थं आदिशब्दः एवं च विशिष्य कस्यचिद्द्रव्यार्जनविशेषस्य क्रत्वर्थतया विहितस्योद्देश्य
ने त्वाभावात् अर्जनमात्रमेवोद्देश्यमिति आर्जनमात्रस्यैव नियमांगत्वेन तद्बलात् भवक्रत्वर्थत्वं द्रव्यार्जन
मात्रस्यैव न्याय्यमित्याह तस्मादिति एवं चेति सर्वस्यैव द्रव्यार्जनस्य क्रत्वर्थत्वे सति प्रतिग्रहाद्दहन्त्यत्रयेत्ता
ने मवतेषु रोडाशमष्टाकपालं निर्वपेदिति तामंतेष्टेरेतामेव निर्वपेद्यस्य हिरण्यं नश्येदित्यादीनां च क्रत्वर्थग्रह एम०
गा हिरण्यादिदाहनाशादिनिमित्ते विधीयमानानां भिन्नेतु होतीत्यादिवत् क्रतुनिमित्तिकाङ्गत्वोपपत्तेः एव ६

कफलंनकल्पनीयमितिलाघवंस्मिन्पक्षेपुरुषार्थत्वपक्षेतुनामवत्वादीनांक्रत्वर्थत्वेप्रमाणाभावात्
फलकल्पनागौरवंस्यादित्यर्थः ननुक्रत्वर्थत्वेप्यर्थवादिकंफलमवर्जनीयमितिशंकांनिराकर्तुंखादिरत्वव
दित्युक्तं यस्यखादिरःस्रुवोभवतीदं छंदसामेवरसेनावघंतिखादिरत्वादीनांक्रत्वंगत्वापत्त्यार्थवादिकफला ती
येस्यातद्वदिहापीत्यर्थः नचैवंक्रतुमध्यएवद्रव्यार्जनंस्याद्गणानांप्रधानकालकर्तृत्वादितिवाच्यं याज
नाध्यापनयोः क्रतुमध्येनुष्ठातुमशक्यत्वात्प्रतिग्रहस्यापिनियमेनक्रतुमध्ये दुर्लभत्वाच्चक्रतुविलो
पप्रसंगाद्गंगस्याप्यस्यसामर्थ्यात्बहिरनुष्ठानोपपत्तेरित्याशयेनोपसंहरतितस्मादिति ननुवर्णानांतुकर्म
र्णामस्यत्रीणिकर्माणिजीविकाइतिस्मृतेःपुरुषार्थत्वमेवेत्यतआहतथाचेतिन्यायोपबृंहितत्वात्प
तार्थमितिप्रवेत्तोस्पेतिपर्णत्वितिस्मृतिस्तुजीवनलोपेक्रतुलोपप्रसंगात्क्रतुरेवहस्वविध्यर्थेनमात्रे जीव
द्रव्यविनियोगमनुमन्यतइतितत्फलप्राप्तानुवादइत्यर्थः।अनुमानेनेतिउपायनिमविधिमूलकानुमा
नेनेत्यर्थः॥ध्यशाद्धस्वचिंतयुत्तयंतंवदन्श्लोकंव्याचष्टेरागेतिनन्वेवंद्रव्यस्यक्रत्वविनियोज्यत्वात्
क्रतुनिर्वृत्तिर्नस्यादतआहक्रत्वपीतिननुक्रतुस्वविधिप्रयत्नमेवजीवनमात्रेद्रव्यविनियोगमनुमन्य
तइत्युक्तमित्यरवारस्यादाह इत्येतियत्किंचिदंगानुष्ठानस्यैवदर्शपूर्णमासोपक्रमत्वादुपवासम

सोम४

सुवर्णास्त्रोकार्षीव्रते योदर्शपूर्णमासयाजीसन्नमावास्यांवापौर्णमासींवातिपातयेत्तंदित्यनुपक्रमदर्शनं
नोपपद्येदित्यर्थः इदंचातिपातनमनुपक्रमइत्याश्रित्योक्तं अत्र त्वनुष्ठानमनिपातनमित्याश्रियमाणेऽङ्
गानुष्ठानेपिप्रधानानुष्ठानाभावेनोक्तदोषाभावादितिद्रष्टव्यं दृष्टार्थत्वबलादपिपुरुषार्थत्वमेवन्या
य्यमितरथाक्रत्वपूर्वेलक्षणादृष्टार्थत्वस्यादित्याशयेनाह एवंचेति नन्वेवंनियमापूर्वंकथंनस्याद्यथाकथंचि
दर्शितेनापिहेतुप्रतिघातादिपुरुषकार्यसिद्धेः इत्यतआह नियमइति नन्वेवंदृष्टार्थत्वेसतिह्यश्रुतप्रत्य द
वायपरिहारः क्रत्व॰ यादृष्टकल्पनापेक्षयाक्लृप्तेनक्रत्वपूर्वेणैकवाक्यताया ज्यायस्त्वात् क्रत्वर्थत्वमे
वनियमस्यापन्नमित्यतआह दृष्टमपीति क्रत्वपूर्वस्याश्रुतत्वेपिनतन्नियमफलकल्पनासमयेऽप
स्थितंतद्रूपस्यापकप्रकरणाद्यभावात् पुरुषगतंतुप्रत्यवायपरिहाररूपमदृष्टफलंनियमस्यपु
रुषार्थोद्देनविषयत्वात् तद्वाराउपस्थितंतेनाश्रुतमपिपुरुषगतमेवादृष्टंपरिकल्प्यतदर्थत्वमेव
नियमस्यस्वीकार्यमित्यर्थः एवंचनियमोद्व्याज्ञेनोद्देशेननविधीयते किंतुउभयाज्ञेनमाश्रित्यपुरुष
गतादृष्टार्थतयैवविधीयतइतिनियमस्यद्व्याज्ञेऽङ्गत्वमेवनास्तीतिनतदङ्गतानिर्वाहार्थंद्व्याज्ञेनस त्व०
क्रत्वर्थत्ववाच्यमितिभावः ननुप्रतिग्रहस्यप्रत्यवायजनकत्वेऽत्रतद्भूमे ॥ वयथाप्राप्तिप्रतिग्रहीतव्यं

न्न

स्यान्न च तदुक्तं प्रतिग्रहः समर्थोपि प्रसंगात्तत्र वर्तयेदिति निषेधादित्याशंक्य नियमस्तु काममदृष्टार्थ इत्य
स्य तात्पर्यमाह तेनेति प्रतिग्रहादिति नियमविधेः पापांतरप्रतिबंधपरत्वेऽपापांतरोत्पत्तौ यत्पुरु ला
षः प्रत्यवैतीति दूषितं तावन्मात्रं कल्प्यते ननु प्रतिग्रहोऽपि किंचिददृष्टमिति नोक्तदोष इत्यत आह प्राभाकरमतं
दूषयंतीति पितु मनुवदन्ति केचिदिति तदिति किं क्रत्वर्थोऽयमपरिग्रहः उत पुरुषार्थ इति इयमपरिग्रहशब्दा
वगतायाः इयम्प्राप्तेराक्षेपे विचारणादिति भावः तथा च सतीति नियमस्यैव विचार्यत्वे नियमार्जितस्यैव क्रत्व
र्थता या इयमात्र सा पूर्वपक्षेपि क्रत्वर्थत्वव्यभिचाराभावात् क्षामवत्यादीनां क्रत्वर्थत्वसिद्ध्युपन्यासः पूर्वप
क्षिणो संगतः स्यादित्यर्थः ननु यद्यपि नियमार्जितद्रव्यं पुरुषार्थं संभवति तथापि न तदा तथापि न तद
पत्तिमतः क्षामवत्याद्यधिकारः तथात्वे नैमित्तिकाधिकारे सति प्रयुक्त्यंतरकल्पनाप्रसंगात् अतः प्र
युक्तिकल्पनागौरवपरिहाराय क्रतुप्रयुक्तिसिध्यर्थं क्रत्वर्थधनापत्तिमत एव क्षामवत्याद्यधिकार
तदुपन्यासो युक्त इति चेत् न एवं तथा सति सिद्धांतेपि प्रयुक्तिलाघवात् क्रत्वर्थत्वेवस्यापदि नैमित्तिकाधि
कारस्य मत्कृत्वा सिद्धांते नैमित्तिकाधिकारोऽङ्गीक्रियेत तर्हि पूर्वपक्षेपि न तएवं नैमित्तिकाधिकारत्वात्
पत्त्या क्रत्वर्थत्वं न स्यान्न स्यात्परमते तेषां क्षामवत्यादीनां पूर्वपक्षे क्रत्वर्थत्वं सिद्धांते तु नैमित्तिकाधिका

सो०म०४ त्वमिति विशेषो दुर्लभः न च सिद्धांते क्रत्वर्थत्वाभावाद् द्रव्यस्य क्रत्वर्थद्रव्यापत्तिमतोऽधिकारो न संभवती
८ ति वाच्यं सिद्धांते पूर्वपक्षवत् नियमोपार्जितस्य सर्वस्य द्रव्यस्य क्रत्वर्थत्वाभावेपि हिरण्येन श्रीणातीति हि
रण्यपाशिरभिमुख्यो नीत्यादिप्रातिस्विकवचनैः क्रतुविनियुक्तस्य द्रव्यस्य क्रत्वर्थत्वावश्यंभावेन तादृश
द्रव्यापत्तिमाद्य क्रत्वर्थत्वोपपत्तेरिति भावः सोपि न स्यादिति नि पुरुषार्थं द्रव्यस्य पूर्वपक्षेपि संभवादि
त्वमेव हेतुरनुवर्तनीयः ननु पुरुषार्थद्रव्यसंभवेपि पूर्वपक्षमाने क्रत्वनुष्ठानसमये यत् क्रत्वर्थद्रव्यार्जनं
तत् प्रक्रमादेव दर्शपूर्णमासादेरपि प्रक्रांतत्वाद् अनुपक्रमदर्शनं न स्यादिति आपादनं संभवतीत्यत आह द्र
व्यार्जनमिति पक्षमाने हि समये क्रियमाणस्यार्जनस्य तन्मात्रार्थत्वेन गत्यमाणविशेषतया सर्वक्रत्वर्थत्वा
भावेन तत्र क्रमप्रमात्रात्र सर्वक्रतूपक्रमप्रसक्तिरिति भावः प्रयोजनं पूर्वपक्षे प्रतिग्रहाद्यर्जितस्यैव द्रव्य
स्य क्र[illegible] तादृशप्रयोगसिद्धांते तु यथा कथंचिदर्जितस्यापीति तद्रव्यार्जितकर्माणि पुरुषार्थानि अत्र प
र्युदासपक्षे क्रत्वर्थत्वं तद्द्रव्यभंक्रतूपस्थापकाभावान्न चानीतत्वेन संकल्पस्यैव तद्रव्यक्रतूपस्थाप
कत्वं संभवतीति वाच्यम् नीतत्वेन क्रत्वभिधानाभावेन क्रतूपस्थापकत्वाभावात् फलकल्पनाभयाच्च ला०
त्वा लाघवतर्कमात्रतया स्वतः प्रमाणत्वाभावेन तन्मात्रेण क्रत्वर्थत्वासिद्धिः स्यात् पर्युदासपक्षेपि पूर्वप ८

त्तोक्तिः प्रौढिवादमात्रमितिमनसिनिधायतदर्थसंग्रहमाह तथेतिप्रतिषेधइतिईक्षणंकर्त्तव्यं यत्तत्रेत्ये
वेकस्यापिपदस्यलक्षणंविनैवकर्त्तव्यतानिषेधप्रतीतेः प्रतिषेधेसर्वत्राऽश्रुतिवत्तेइत्यर्थः पर्युदासइति
।त्रन्वीक्षणसंकल्पोहि पर्युदासपक्षेविधेयस्यचेक्षणविरोधित्वादीक्षतिधातुनानञ्भ्यांभाभ्यांलक्षयित
व्यइत्यर्थः यद्यपिचतुर्विधपदेचात्रद्विविधस्यैवार्थनिर्णयः क्रियतेसंप्रयोगात्तेनोपसर्गनिपातयोः न
ग योरर्थाभिधानेद्वित्वंनैवविद्यते यदर्थद्योतकौतौतुवाचकत्वविरोधित्वस्यविचार्यतइत्याकृत्यधिकरण
वार्त्तिकरीत्यानिपातत्वान्नञःश्रुतिवत्त्वंचानुपपन्नंतथापिसतिधातोर्निषेधवाच्यकत्वविरोधित्वलक्षकत्वयोः
नद्वःपदद्वयसंग्रहानहंकृतत्वात् नञोश्रुतवत्त्वलक्षकत्वोक्तिरितिध्येयं ननुब्राह्मणोनहंतव्यइत्यादिवत्
प्रतिषेधेपिपुरुषार्थत्वंकिंनस्यादित्यतआहसचेतिप्रीतिंगृह्णातीतिप्रीतिगृह्णमेवावर्त्तवर्त्ततेतस्याएवप्रीतिप्रवृ
पस्थितेः ब्राह्मणोनहंतव्यइत्यत्रतुवैदिकस्यवधस्याभावादगत्यापुरुषार्थत्वमितिभावः ननुहंतमादि
त्यमीक्षेतेतियत्तत्रेतिनिषेधोनोपपद्यते निषेधेनिषेध्यस्यादित्येक्षणस्यानुपपत्तेनतस्यानुपपत्त्यदेनवि
शेषमशक्यत्वादित्याशंक्यआदित्यमीक्षेतेतियत्तत्रोद्यतमितिवचनमत्रांगीकारात्रविशिष्टानुवादो
पइत्याशयेनाहतेनेतिननुकर्मांगभूतस्यादित्येक्षणस्यनिषेधेविहितप्रतिषिद्धत्वादिकल्पस्यान्न

सोम.४ ६ चविधेरादित्यमात्रविषयतया प्रतिषेधस्योपदवस्थादित्यविषयतया भिन्नविषयत्वान्न विकल्प इति वाच्यं सा
मान्यविशेषभावेन भिन्नविषयत्वेपि विकल्पस्यावर्जनीयत्वाद्ग्रमिपर्युदासाधिकरणे सामान्यविषयस्या
पि निषेधरूपत्तीव्यत्वविशेषविषयप्रतिषेधेन तुल्यबलत्वादिकल्पस्यैव प्रकारेणावश्यमापन्नत्वात्र च दि
कालविशेषादित्वानार्थतयान्नतवदनवत्क्रतूपकारतामात्रेण प्रसक्तं यदीक्षणं तस्यायं प्रतिषेधः
तेन विहितस्य प्रतिषेधो न भवतीति न विकल्पापत्तिरिति वाच्यं क्रत्वर्थतया विहितत्वाभावे क्रतूपकारताम
त्रेणावैदिकत्वाभावेनवैदिकत्वसामान्याद्क्रतुस्यक्रतुनिवेशस्यासिद्धिप्रसंगादिति चेन्नैव क्रत्वनुपहाय प्र
तिषेधस्येति विकल्पस्यान्याय्यप्राप्ततयादोषत्वाभावादिति भावः पुरुषार्थत्वे फलकल्पनागौरवापत्तिरपि क्र
त्वर्थत्वमेवेष्टव्यमित्याह फलं चेति अथापीति क्रत्वर्थत्वपक्षेप्यादित्यानीक्षणसंकल्पं कुर्यादित्येवमेव पर्यु
दासः न तूद्यदवस्थाद्यनापन्नादित्येक्षणं कुर्यादित्येवंरूपः आदित्येक्षणविधिसान्निध्याम्नानाभावेन त
देकवाक्यत्वाभावेन तथा पर्युदाससंभवादेकवाक्यत्वाभावेपि पर्युदासाश्रयणे नत्तौ यशोकरोतीत्यादाव
पि पर्युदासप्रसंगादिति ध्येयं फलकल्पनाभयात् क्रत्वर्थत्वस्य विश्वजिद्रात्रिसत्रहिरण्यभरणादावपि वक्तुं राम०
शक्यत्वान्नैषामप्येतदधिकरणविषयत्वमित्याहुः उपक्रमस्त्विति उपक्रमे व्रतमित्यनेन सामान्यतः किंचित्क ६

मेकर्त्तव्यमित्युच्यते तच्च सामान्यं विशेषमंतरेण न पर्यवस्यतीति कीदृशं तत्कर्त्तव्यं कर्मेति विशेषापेक्षायां नेदं त
मित्यस्य व्रतमित्येवं व्रतशब्देनान्वयेसतितदन्वयवलात्कर्मविशेषपरत्वावश्यंभावात् अभावस्य कर्मसामा
न्यवाचिव्रतशब्देनान्वयानुपपत्त्या प्रतिषेधानुपपत्तेः। तद्विनाभावसंबंधेनाल लक्षणामंगीकृत्यसंपुद
सर्वकाम्य इत्यर्थः। नचोपक्रमश्रुतकर्मसामान्यापेक्षितो विशेषश्चात्मनेपदाल्लब्धुं शक्यत इति वाच्यं कर्मणोंगाप
गदानतयोत्पासेघनंतस्त्यतया प्रमाणमंतरेण कं दृष्टोपकर्मविशेष इत्यवधारणायोगेनात्मनेपदत्वाभा
दिति भावः क्रतोर्वर्हिःश्रुतः क्रतुप्रकरणान्नाम्नात इत्यर्थः तत्श्चप्रकरणाद्यभावेन क्रन्वपस्थित्यभावात्तदर्थ
त्वंनसंभवति पुरुषस्तु क्रियया कर्त्रात्मेपादत्रैव वाक्ये उपस्थित इति तदर्थत्वमेव इति भावः ननु क्रतोर्वर्हिश्च
वरोपितत्वया हवनीयादेः क्रत्वर्थत्वं दृष्टमतश्चाह श्रुत्यादिति तथापि फलकल्पनाभयात् क्रत्वर्थमस्तु तत्रा
ह पुरुषेति प्रवर्त्तकस्य विधेस्वरसतः साक्षात्पुरुषापेक्षितफलसाधनताबोधकत्वात् तत्स्वारस्यभंगप्रसं
गात् क्रत्वर्थत्वमाश्रयितुं न युक्तमित्यर्थः नचात्यंतात् श्रुतफलकल्पनापि वाक्यशेषश्रुतत्वादित्याह त
चेति एतावताद्येन साधुयुक्तो भवतीति वाक्यशेषे एतावतानीलक्षणसंकल्पमात्रेण युक्तयेन साभवतीति प्र
पत्ययश्रवणात् वक्ते मार्गपदेशोपि ए त्रिसत्र्यायेन तस्यैव फलत्वं यद्वा एतावतार्थलक्षणमात्रेण न साधुक्तो

सोम०४ भवतीतिईदृशस्यापायहेतुत्वे सति अर्थादनीदृशसंकल्पस्यापायस्य फलत्वं बोध्यं एवं बोधनमिति शङ्कां प्र
१० त्यये नादित्योदयस्य नित्यतिमित्तत्वावगमात् नित्यवदुदयावस्थादित्येनीदृशत्वेन संकल्पः कार्य इति संध्यावंद
नादित्येतुल्यत्वमस्येति भावः सूत्रार्थस्तु तस्याः प्रतेरुपसर्गे पिण्ड्याञ्जेनादिवत् प्रीत्यनुपलंभे पि प्रजापति
व्रतादीनि पुरुषार्थानि शास्त्रस्यानतिशंक्यत्वात् शास्त्रेण पुरुषार्थेन बोध्यमाने प्रीत्यभाव प्रयुक्तशंकाया
अनवकाशादिति यावत् शास्त्रस्य क्रत्वर्थत्वेप्युपपत्तिमाशंक्याह नचेति नचैभिः कर्मभिः क्रतुसंबंधिद्रव्य
विकीर्ष्यते क्रत्वर्थद्रव्यसंबंधो नैवामितियावत् स्यक्रत्वर्थत्वेप्युपपत्तिमाशंक्याह नचेति येन तद्वारा क्र
त्वर्थता स्यादतस्तेनार्थेन पुरुषार्थेन संबंधादनीदृशादिक्रियायां पुरुषस्य कर्तृत्वेन शेषित्वेन वाङ्कतिरिति
त्रत तद्दुत्संगद्रव्यनैनैवद्रव्यान्तत्वैन्तेरा प्रीत्यनवगमात् क्रत्वर्थमेवेति प्रत्यवस्थानात् तत्संगतिरिति सूचितं
द्रव्यानित्यविशेषणानर्थक्यात् प्रतीयेरन् किञ्चिद् द्रव्याणीह विधित्वेन प्रधानमागस्यसाध्यस्य धना निवृत्त
द्दननादेर्वातदर्थं च किं यत्नाद्युधवाक्यं विधिरनुवादो वेति संशये द्वयमेकत्वेनाह किमिति यथा पूर्वत्र व्रत
शाब्दत्वात्रैच्छिकेति नप्रतिषेधः एवमिहापि यत्नाद्युधशब्दत्वात्रोद्दननादिमात्रसाधनत्वमिति प्रत्यवस्था राम०
नात्संगतिः ननु विधिप्रत्ययाभावाद्विधिप्रतिबंधकवैशब्द्याच्च कथं विधिरिति पूर्वपक्षेत आह अर्थवत्वा १०

ना

दितिप्रवृत्तिविशेषकरत्वादित्यर्थः तद्वत्त्वादेव विधिप्रत्ययः कल्प्यः वैशब्दश्च यदाग्नेय इत्यादौ प्रसिद्धत्वादिवतन
विधिं विहंतीभावः नन्वेवमपि यष्टशब्दस्य प्रयाजादिसाधारण्यात्कथं प्रधानहविर्होमार्थत्वमत आह यष्टशब्द इति·
यष्टस्याप्रधानयोगे नाहुतौ रोनेति· साधनपरत्वाप्रधानशब्दः सिद्धांतइत्वेतिभावः। ननु हविरासादनोद्देशेन वि-
त धीयमानत्वेऽपि दितस्तुकीर्णाग्प्रधानार्थवत् सत्त्वोद्देशेन न साधनतया विधीयमानोऽस्फ्यादीनामग्प्रधानार्थत्व ना
मेवस्यात्प्रकरणात्प्रधानमात्रार्थत्वं यष्टशब्दस्य साधारणपादस्तु वा यष्टशब्दः प्रधानमात्रपरः तथापि यष्ट-
मन्त्रपतत्साधनतया स्फ्यादिविधिर्न संभवति समासांतर्गतयोः पदयोः एकमुद्देश्यकमितितद्विधायकमित्यन्य-
त्रांगैश्चेषुकृतइमित्यादौ निरूपकरणादिति चेन्नैवमेतानीति स्फ्यादीनीत्यूहयूचतानि यष्टसाधनानि कर्त्तव्यानीत्येवं
विधिस्वीकारेणोक्तदोषाभावादिति भावः नन्वेवमप्याग्नेयादेरुत्पत्तिशिष्टपुरोडाशाद्यवरुद्धत्वेन तत्साधनत्ववि-
ध्ययोगात् प्रकरणाद्दर्शपूर्णमासांगतया यागांतरविधिरेवस्यादित्यत आह पुरोडाशादिभिरिति देवताया
श्चलाभाद्यागांतरविधिर्न संभवति न चाव्यक्तत्वेन सौमिकधर्मप्राप्त्यै देवतालाभः दर्शपूर्णमासयोरांगयोर्देह
समाप्यतया वीं दीक्षोपसदादिसौमिकधर्मप्राप्तौ तद्विरोधापत्तेर्वैमृधवत्पृथक्तंत्रत्वेऽपि प्रधानकालएवक-
तैव्यतायाश्चापरिहार्यत्वाच्चपर्यग्निकृतपालीवतमुत्सृजतीत्यादौ इयेनशेषत्वसंख्यापपत्तीत्यत्राह हविर्वियोगे

सोम॰४ नुषंगात्पत्नीवत्तालाभवदत्राप्यनुषंगात्प्रकृतं पात्नीवतमुत्सृज्यान्यो यस्तेनशेषं भक्षं प्रयतीत्यत्रान्यस्यचि
११ प्यकर्तानैवानुषंगात्पत्नीवत्तालाभवदत्राप्यनुषंगात्प्रकृताग्नादिदेवतालाभ इतियुक्तं अनुषंगस्यानेकवाक्य
त्वव्यवधानेनात्रानुषंगायोगात् अन्यथादेवतायाः लाभेऽपि द्वाक्यस्य कर्मांतरविधायकत्वासंभवात्
अनुवादकत्वमितिपौर्णमास्यधिकरणसिद्धांतो विरुध्येत तत्राप्यनुषंगेण देवतालाभसंभवात्तस्मादिष्ट्या
यंतरविध्यसंभवाद्गणस्योत्पत्तिशिष्टैरपि मुखेदाग्नादिभिर्विकल्पस्समुच्चयो वा नि क्रियत इत्यर्थः वैषम्या
दिति उत्पत्तिशिष्टत्वेनोत्पत्तिशिष्टपुरोडाशाद्विवैषम्यादित्यर्थः इदं चापाततः उपांशुयाजे उत्पत्तिशिष्टद्र
व्याभावेन तत्र द्रव्यविधेः पूर्वपक्षिणानुमतत्वेन तत्रोक्तदोषाभावादिति ध्येयं एकार्थ्यादिति एकार्थत्वं तु वि
कल्पेऽत्र शिष्टमिति द्वादशन्याये नैकार्थानां समुच्चयाभावादिति भावः निरपेक्षेति समुच्चये परस्परसापेक्ष
णामेवासाधनत्वात्तिरपेक्षाणामेवासाधनत्वात्त्रिरपेक्षत्वावगमश्रुतिर्विरुध्येतेति भावः नच यद्वादा
नर्थक्यादिविधित्वे सतीदं सर्वं सोढव्यमित्याशंक्य संभरणविध्येकवाक्यतया तच्छेषत्वार्थत्वात्रानर्थक्यमि
त्याशयेनाह मन्त्रा मुखानीति सूत्रार्थस्तु स्पष्टा दिरूद्याणि प्रतीयेरन् संप्रदेय इह विधिसंबंधपुरिताप्राय एम॰
त्वायुधवाक्यानर्थक्यात्सदेमत्वे सति अविशेषेणाश्रुतान्यविधिप्रकरणस्थानमात्रार्थानीति तत्रैकत्व ११

मयत्तांगमर्थस्यगुणभूतत्वात् यद्वैकत्वादिव्यावृत्त्यर्थमाह द्व्यादेर्येति चतुरो मुष्टीन्निर्वपतीति प्रातिपदि
२ काभिहितसंख्याया अविवक्षावश्यंभावाद्व्यावृत्त्यर्थमाह विभक्तीति नन्वेकत्वस्याविवक्षितत्वेपि प्रथमैवानिय
म्यतकारणाद् इति क्रमस्यादिति कथितत्वाधिकरणन्यायेन एकस्यैव प्रयुक्तिसिद्धेः फलाविचार इत्यत आह
एकत्वादिसंख्यास्यादिश्रादिष्टद्वात् अनन्नाहोयुनक्ति कपिंजलानालभेतेति द्वित्वबहुत्वयोरप्युपलक्ष
णत्वेनविषयत्वान्नद्विषये सफलोविचार इति भावः किमविवक्षितान्नतविवक्षितस्तदर्थं वा किमयत्तांगमु
तयत्तांगमितिसंशयद्वयं सकलमाह किमितिनन्वेकप्रत्ययरूपायाश्रुतेः पदश्रुत्यपेक्षयाप्रबलत्वा
त्तेयं संख्यायाः कारकान्वये सतिक्रियांगत्वात् कथंपूर्वः पक्ष इत्यत आह तत्रेति सत्त्वप्रधानानिनामानीत्य
तिवाक्यस्मृतेः प्रातिपदिकार्थस्यप्राधान्यात्प्रधानान्वयस्याभ्यर्हितत्वात् पदश्रुत्यायश्चान्वय एवं संख्या
यानतु प्रत्ययस्थत्वाकारकान्वयः नच प्रत्ययार्थप्राधान्यमपिशाब्दिकैः स्वीकृतं इति वाच्यं तस्याख्यातविष
यत्वेनाप्युपपत्तेः संख्यादीनामपिप्राधान्यवारणमतस्मृतेस्संकोचावश्यंभावादितिभावः एवं च संख्या
याः प्रत्ययस्थतिगम्यकारकान्वयस्यापियत्रित्यात्स्वत्वेसतिवाक्यमादायपत्तांगत्वहृद्भवेतमित्याशयेनाह
पदांतरेति एवं च यथासंख्येनोभयंतीत्यादिश्रुत्याद्वन्नाद्यर्थानां पदान्तरायुक्तवाक्येनयत्तांगत्वंतथात्रापि

१५८ अस्यापत्यार्थस्यैकत्वस्य न प्रत्ययार्थत्वमिति प्रत्ययवस्यानानात्वं गम्यते ... नैकत्वस्य प्रकृत्यर्थेऽन्वयेपशोः कारकान्वयत्वसामर्थ्ये +
सोम ४ + कत्वविशिष्टस्यैव तस्यान्वयादेकत्वस्यापि प्रत्ययांगत्वं शंकनीयं विरम्यव्यापारायोगेन प्रत्ययेन प्रथममेकत्वस्य प्रकृ
१२ संबंधबोधयित्वात्तदनंतरमेकत्वविशिष्टस्य तस्य कारकान्वयबोधनायोगात् युगपदेव संख्याकारकार्थयो
श्री प्रशोरन्वयेन संख्याविशिष्टः वै[illegible]ण कारकान्वयानुपपत्त्या केवलस्यैव पशोः कारकान्वयादिति भावः
न च कारकान्वयेपि कथं प्रत्ययांगत्वमत आह क्रियायामिति कारकस्य क्रियानिर्वर्तकस्वभावत्वात्तदन्व
येन सामान्यतः क्रियांगत्वे सिद्धे प[illegible]ति[illegible] समभिव्याहारेण तस्य यागरूपत्वावगमाद्यागांगत्वमित्यर्थः
यदुक्तं प्रातिपदिकार्थस्य प्राधान्यात्तदन्वय एवेति तत्त्रिकरणाभिप्रायेणाह प्रधानभूतेनेति यदि
प्रातिपदिकार्थस्य प्राधान्यं तदा तस्य कारके गुणीकरणाभावात्कारकस्य तद्गुणभावे सति कृदंताभि
हितस्यैव कारकस्य क्रियान्वयो न भवेदतो न प्रातिपदिकार्थः प्रधानं किंतु प्रत्ययार्थ एव तत्रापि वाक्य
स्य क्रियाप्रधानत्वात्तदर्थत्वाच्च कार[illegible]कस्य तस्यैव प्राधान्यं न तु संख्यादेः यत्र तु गोः स्फुरत्यादौ न क्रि
यान्वयस्तदभिप्रायं पूर्वस्मारणं न चैवं प्रत्ययश्रुत्यैव संख्यावरुद्धे कारके दुर्बलया पदश्रुत्या पशोरन्वयो न
स्यादिति वाच्यमेकसंख्येन कारकेणावरुद्धत्वमित्युक्ते किं तत्तीयत इति विशेषापेक्षायां तावत्त्वेनानुगुणत्वाद्दु राम०
र्बलप्रमाणकस्यापि पशोरन्वयाविरोधादिति भावः प्रत्ययेन कारकसंख्ययोः प्रथमभिधानमाश्रित्य एकप १२

दोपात्तप्रातिपदिकार्थापेक्षया एकप्रत्ययोपात्तकारकस्य सन्निहिततरत्वात् प्रधानत्वाच्च कारके एव संख्यासंबंधो
न प्रातिपदिकार्थे इत्युक्तं वस्तुतस्तु संख्याकारकयोः न पृथगभिधानं किंतु संख्यान्वितमेव कारकमभिधीय
ते ततश्चाभिधानदशायामेव कारकान्वितत्वात् संख्यायाः न प्रथमायाः प्रातिपदिकार्थमात्रे प्रसक्तिरिति तद्ध्वन्यं
कं च न्यायरत्नमालायां विभक्तेरेव लिंगसंख्याकारकाणां तत्र तेषामन्विताभिधानमेवाभिधानादनन्वितानामने
केषामर्थानामेकेन शब्देन युगपदभिधानस्यैकशेषमंतरेणासंभवात् यथाहुः शब्देनैव विदेवनादिनामस्य
थानामानयेत्यादिवर्थाकांक्षायां चित्तक्रिमत्तमानयेदित्युक्ते विदेवनादीनामन्यतममानयेत्संदिग्धे च किं पुरोयं प्र
युक्त इति तस्मादन्वितानामेवाभिधानं तत्रापि प्रतीतिबलेन कारकं प्रधानं ततः लिंगसंख्ये गौणे इति नन्वेकत्वस्य
पृथक्त्वासंभवेन तदुपपद्यत इति भावः तथा च लिंगं एवं चेति अनेन भाष्ये संख्याया अविवक्षितत्वे तत्समानन्या
तिकं लिंगमविवक्षितं स्यात् तथा च वसंते प्रातराग्नेयीं कृष्णग्रीवीमालभेते त्यादिना विहितपश्वनुवादेन गर्भि घ
ण्यो भवंतीति गर्भलक्षणस्त्रीलिङ्गस्य विधानमुपपन्नं भवतीति पूर्वोधिकरणे शबलेनापीदं सूत्रं व्याख्यात
मिति सूचयति अतिदेशस्याधिकरणकानिराकरणार्थत्वान्नमाह लिंगमिति अलिंग इति ननु सकलस्य प्र
पंचस्य प्रपंचस्य सत्वरजस्तमोगुणात्मकत्वमाश्रित्य शब्दादिके सत्वरजस्तमोगुणानां नित्यरिणामभूतशब्द
पसंबंधाभावे सत्यपि नापूर्वस्तस्मिन् गुरुत्वापत्तेर्बोधकतेज्युतत्वे सिद्धौ वाध्येते त्वतमाह पञ्चादिति पार्ष्टिक ५

सोम-४
१२
स्पर्शरूपरसगंधानांचआविर्भावः पुल्लिंगंतेषांतिरोभावस्त्रीलिंगंतेषांसाम्यंनपुंसकमिदंचलिंगत्रयंसर्वेषा
मपिवस्तूनामस्ति तथापिकेनचिद्विवक्षितेनकिंचिल्लिंगमभिव्यज्यतइत्यत्रोक्तत्वाच्छब्दादीनामपिपुल्लिंगादेर्विवक्षि
मानत्वादिदमयुक्तमितिवाच्यं लोकप्रसिद्ध्यनुसारेणस्तनकेशवतीस्त्रीस्याल्लोमशःपुरुषःस्मृतः उभयोरन
तरंयुक्तंतदभावेनपुंसकमिति स्तनकेशादेर्वाहस्तित्वावदर्याचहोनिवृद्धेस्समुच्चयः अतस्तांजाति
मिथ्यंतिस्तनकेशाद्यमित्यभ्यजातिविशेषस्यवालिंगत्वादाविर्भावादेस्तु शाब्दिकैः शब्दानुशासनाय
लिंगत्वेनपरिभाषणमात्रमितिनतस्यलोकव्यवहारगम्यशब्दार्थत्वसंभवइति नात्रतादृशस्यलिंगस्य
स्यविचार्यत्वमितिनदोषः अतएवसंख्यानं न प्रसवौ लिंगमास्थेयौस्वकृतांततइतिशाब्दिकैरेवतिरो
भावाविर्भावलक्षणस्यलिंगस्यपारिभाषिकत्वस्पष्टमुक्तमितिभावः शब्दस्येतिदावादेर्विभक्तिविकार
रणंतित्वाप्रातिपदिकविकारणंचयथासंभवंवाचकत्वमित्यर्थः आश्रयविशेषविशेषेणभावोर्थः प्रती
येत। ननुत्यागांशस्यदृष्टप्रयोजनाभावेनअपूर्वार्थत्वस्यावश्यंवाच्यत्वात्कथंएवंपक्षइत्यतआह एकसे
तिमृगोहिचोदितोनतदेकदेशस्यएकेनैवदेवतनास्मरणादिनादृष्टेनप्रयोजनेननिराकांक्षइतित्यागांशस्य राम०
स्याचोदितत्वेनपृथक्फलापेक्षाविरहात् नतस्यादृष्टफलकत्वमित्यर्थः दृष्टइतिअनेनयथाद्यपरिक्षे १३

दद्रूपद्रव्यद्वारा लिंगसंख्ययोस्साधनत्वमेवमुत्तमप्रयाजादीनामपीति प्रत्ययवस्थानात्संगतिरिति स्पष्टितं देवते
ति स्वाहाकारवषट्कारपुरोडाशस्विष्टकृत्सु मंत्रेणयाद्देवतोद्देशः ग्रासस्य यथा यथं यत्स्वमात्मानाभिमन्त्राणां च देव
तानां स्मारणलक्षणस्संस्कारः प्रयोजनमित्यर्थः प्रक्षेपादिति स्विष्टकृतियः प्रक्षेपो ग्रासकृतकस्याकीर्णोक
रस्यद्रव्यस्य प्रतिपत्तिलक्षणसंस्कारप्रयोजनक इत्यर्थः यद्यपि प्रक्षेपो देवतोद्देशेन त्यागाग्रासांद्यर्थीतर्गतत्वा
भावात्र यागांगग्रासस्तथापि प्रक्षेपस्य देवतोद्देशेन त्यज्यमानत्वाद्रव्यांपकर्तृत्वात्सोपि यागांगग्रासइवप्रतीयत
इत्येतावता प्रक्षेपो द्रव्यसंस्कृतिरित्युक्तं यद्वोत्तमः प्रयाजः वषट्कारपुरोडाशस्विष्टकृत्स्वेवमादयइति विषय
प्रदर्शकवाक्ये आदिग्रहणसंग्रहीतपिष्टलेपफलीकरणहोमाद्यभिप्रायेणोवर्तते यां होमत्वात्तत्र प्रक्षेपाः
स्यां ग्रासत्वसंभवादिति ध्येयं त्यागांगग्रासस्येति अवयवस्य स्वरूपेणोचोदितत्वेपि अवयवांतरानर्थक्येअवय
विचोदनास्यावयवगोचरत्वेन सार्थक्यं लभत इति त्यागांगग्रासस्याप्यस्ति प्रयोजनापेक्षेति तस्माद्दृष्टप्रयोजनं
अवश्यंवाच्यमित्यर्थः ननु स्वाहाकारस्य केवलदृष्टार्थत्वे वांतरापूर्वाभावेनांगापूर्वे प्रयुक्तोभिक्रमव व
णाद्यसिद्धेस्तत्रापूर्वसद्भावस्तुत्याद्दनस्याभिक्रमणादित्वलक्षणं प्रयोजनं वषट्कारपुरोडाशेचापूर्वाभावेक्र
प्रयुक्त अपूर्वं दार्शपौर्णमासिकस्थमस्तीति देवताभावान्नदतिदेशलक्षणं च प्रयोजनं संभवति स्विष्टकृति तद्युस्या

सोम०४ १४ दनस्यतु न किंचित्प्रयोजनं यथा पूर्वं पदेप्रतिपन्नित्वात्तदर्थावदाननाशे लोपस्तथा सिद्धांते प्येकदेशद्रव्यत्वेनद्र
व्यप्रयोजकत्वाभावात्स्त्रोपाविशेषादिति चेत्सत्यं मुन्नरार्द्धादि द्रव्यप्रयोजकत्वाभावे पि अद्रष्टार्थत्वे सत्यद्र
ष्टस्यात्रसंपादनीयस्य स्यस्वीरिणहवींषि नश्येपुर्डुष्येपुरपहरेयुर्वा अन्येन तादेवताः प्रतिसंख्याय यज
तेति हविनांशे विहिते नान्येन स्विष्टकृत कर्तव्य इत्यस्ति प्रयोजनमेवे पिष्टलेपफलीकरणहोमयोरपिद्र
ष्टव्यं सूत्रार्थस्तु ये अग्नौ न परकीय इत्यदेवतासंस्कारकत्वे नाश्रयंतिते आश्रदीयणं तेषु भाव्यत इति भावो एषकः
र्थः अपूर्वं प्रतीयेत अन्येयं तिज्ञतिज्ञहोतीत्यादिभिरपूर्वो येरविशिष्यति अर्थे न सम वैषम्यमतो द्रव्य
स् कर्मणां च च स्यत्रस्यन्याय्यत्वात्सादकत्वाभावात्र संगत्य नव प्रतिज्ञार्थत्वं शंकनीयमध्याया द्वावेव प्रति
ज्ञायाः कृतत्वेन पुनरपितदनुपपत्तिरित्याशंक्याह एवमिति एतदेवेति प्रयोजकत्वाद्यं प्रयोजकत्व
मेवेत्यर्थः कचिदिति दध्यानयनादिष्वित्यर्थः गोदोहनादिषंगत्वस्यैव विचारणात्तस्यैवाध्यायार्थत्व
मित्याशंका प्रयुक्तेरध्यायार्थत्वेन द्विचारणसंगत्यशंका च व्यद्रसितं मिदं सूत्रमनेन हि सूत्रेण हि अतः
मैत्रावरुणदंडादिद्रव्याणां दध्यानयनादिक्रियाणां चार्थे प्रयोजनत्वाभ्युभयप्रयुक्तिर्वैषम्यमेकैने राम०
वप्रयुक्तिरित्यतस्तान्ताश्चिंतयिष्यते इत्युक्ते प्राक् प्रयोजकाप्रयोजकत्वं फलत्वतयाचिंतितमिति लाभाद्यतव १४

सोम.४ तत्रामिक्षाया अर्थांतरत्वमनुपपन्नमित्यत श्लोकं व्याचष्टे वैश्वदेवेति काठिन्यात्मकरूपस्य रसस्य च भेदेनामिक्षा
१५ याअर्थांतरत्वे सति तस्यैव हविष्ट्वादिदन्नछब्देन प्रक्रांतपरामर्शो अर्थे षव्योतिरित्येनछब्दवदिति भावः
अतऽइति पयसः स एवामिक्षात्वे हि दध्यानयनं पयःसंयोगात् पयःसंस्कारकं सदामिक्षायागार्थमेव स्याद
र्थांत्वेतरे तु तत्संयोगाभावेन तत्संस्कारकत्वाभावात् द्रव्यादकतामात्रेण तदर्थं स्यात् द्रव्यादकत्वं च वाजिनं प्र
त्यप्यविशिष्टमित्युभयार्थत्वाद्भयप्रयुक्तमेव स्यादित्यर्थः नच सन्निधानादामिक्षार्थतालिंगस्य प्रबल
त्वादिति भावः तदा तछब्देनेत्यर्थः पयस्त्वमिति पयस्त्वजातिद्रव्यत्वाभिव्यंजकं न भवति किंतु माधुर्यविशि
ष्टद्रव्यत्वं तेन घनीभूतपयस एव आमिक्षात्वात् आमिक्षापदवत्वाद्पि पयस एव हविष्ट्वमित्यर्थः न
नु पयसस्तछब्देन परामर्शो नुपपन्नः आमिक्षाया एव तत्वे तरत्वेनामिक्षापदसमानाधिकरणस्य नछब्द
स्य पयःपरामर्शकत्वासंभवादित्युक्तमित्याशंकां ब्रुदस्यन् श्लोकं व्याचष्टे आमिक्षामिति यदामिक्षा
पदं पूर्वं प्रवृत्तिगोवलं तिष्ठतु तावत्तस्य वस्तुमात्राणीत्यास्वप्नेप्युपपन्नमित्येरिति भावः सेति सा वैश्वदे
वीति वाक्ये आमिक्षोद्देशेन वैश्वदेवत्वेनाभिधीयते वरमस्तु तस्यामिक्षापदस्योद्देश्यसमर्पकत्वासंभवात् राम०
किंतु तछब्दापोद्देशेनैव तछब्दस्य प्राथम्येन तस्यैवोद्देश्यकत्वौचित्यादित्यर्थः एवं च पूर्वं पयस्त्वित्याद्युक्तं वै १५

ष्यदेव पाणस्य तावदामित्याह विविति तदुग्धमित्यादयः नन्वेवं दध्येव पूर्ववाक्ये प्रधानं निर्दिष्टं न पय इत्यत आ
ह ताहर्थेनेति तथा च शब्देनोदध्नः प्राधान्येप्यर्थतः पयस एव प्राधान्यमित्यर्थः ननु द्वितीययादध्नः कर्मत्वा
दानयनं दध्यर्थमित्यत्राश्रयेन पच्छतिकर्ममिति आनयनस्य द्विकर्मकत्वात्पयसोप्यस्ति कर्मत्वमित्युत्तरमा
ह आनयनमिति तत्प्रथममिति साक्षात्क्रियया व्याप्यमानत्वादिति भावः द्वितीयमिति प्रथमेन व्याप्यमा
नत्वादिति भावः ननु तथापि कर्मत्वाविशेषात्पयसः प्राधान्ये किं विनिगमकं प्रस्तुतपयसः सत्तम्यगुणत्व
मेवेत्यत आह तच्च प्रथमेनेति यथा मैत्रावरुणायदंदं प्रयच्छतीत्यत्र कर्मणाभिप्रियमाणस्य संप्रदानस्य प्रा
धान्यमेवमिहापि प्रथमेन कर्मणा व्याप्यमानस्य द्वितीयस्य कर्मणः पयस एव प्राधान्यमित्यर्थः उभय
त्र द्वितीयानिर्देशे किं न किं व्याप्यत इति व्याप्यमानत्वस्यानिश्चितत्वम् अत्र कथनया सप्तमीनिर्देशे सति आधा
रस्याधेयव्याप्यत्वात्पयसो दध्ना व्याप्यमानत्वस्य व्यवसानमिति पयसः प्राधान्यानुकूल एव सप्तमी
निर्देश इति भावः नन्वेवमपि लः गुरुमतमानयेत्यादौ शब्दतः प्रधानस्यैव निर्देशादिहापि दध्न एव तथा
त्वनिर्देशस्यादित्याशंक्यमंत्रवत्तो विरोधात्रैवमित्याह तथा चेति तन्त्राभिन्नापदश्यादेः प्रपसमर्पकत्वाभावे
तस्य कथं वाक्येन समन्वय इत्यत आह पय एवेति पयसः प्रतिनिर्देशेन पुंसकत्वापत्तिमाशंक्याह तत्रा

सोम०४ मानाधिकरण्यादिति तन्त्वेवमपि स्त्रीलिंगे तच्छब्दे नोद्देश्यादामिक्षाया एवोद्देश्यत्वं व त्वादायतितमित्याशंक्य प्राति
१६ पदिकं कस्मै वोद्देशकत्वमत त्वात्स्यमेव पुरस्कार्यमित्याशयेनाह स्तोपीति एवं च दध्याप्यमानस्य पयसः
न्तरीयकोधिकारणभावः सप्तम्या सूचितेत तथा च तत्पयसो दध्यानयनेन संस्कुर्यात्तैर्वैश्वदेवं कुर्यादित्येताव जे
न्मात्रं विवक्षितमिति पय एव हविरिति भावः नन्वामिक्षात्ववलाद्ध्येवामिक्षा मधुररसस्तत्त्वस्य पयस इ स
वै तिपरीत्यं किं न स्यादित्यत आह न विति कांक्षिकादिनापि घनीभूते त्रामिक्षाशब्दप्रयोगादिति भावः पयः
प्रतिनिर्देशक इति अत एव हेतुद्वयात्त्रवत्वेन त्वमपीति भावः एवं च द्रवत्वकाठिन्ये कृतद्वैलक्षण्यमात्रे
णोदं पयद्रव्यमामिक्षेति लोके तत्स्ये श्रुतं तत्स्यामिक्षेति वैदे च भेदव्यपदेशस्य विकारार्थ यत्स्त्वयात त वयप्ये
शब्दवाच्यत्वस्याप्युपपत्तेः पय एवामिक्षेत्युपसंहरति तस्मादिति तं अश्लारे तु रूच्चकार्दे हेम विकारत्वेपि हे
मत्ववत् घटादेर्मृद्विकारत्वेपि मृत्त्ववत् पयसो विकारत्वे सत्वेवामिक्षायाः पयस्त्वेन त्वामिक्षापयसोरत्यंत
भेद इत्युक्तं न वाजिने तितत्त्र वाजिनयागात्पूर्वं वाजिनाम ध्वरे पुनर्दध्यानयनेन वाजिनं न संपाद्यमिति
प्रयोजनमिति भावः तत्र पुनर्द्रव्यत्रयपुनत्यभावाद्वाजिनयागस्य लोप इति न्यायः पयस्य सर्वोपि तु वचना रामः
नुष्ठितकृत्वदानेन तदनुष्ठानमिति सूत्रार्थस्तु एकस्माद्दध्यानयनादुभयोर्निष्पन्ने त्वस्यैवैमामिक्षावाज १६

त्रिनं वदध्यानयनप्रयुक्तौ समंस्यादिति यद्यप्येकनिष्क्रान्ते इत्यनेन युगपन्निष्क्रान्तिर्विवक्षिता न च सिद्धान्ते वा
त्रिनस्यानुनिष्क्रामादित्वायुगपन्निष्क्रान्तिरसिद्ध्यानहि पश्चान्निष्क्रामादित्तत्वं अनुनिष्क्रामादिनत्वं किंतु परनिष्क्र
त्पर्थ्यपत्तेनैवस्वार्थयत्नं विना निष्क्रममाणत्वं तत्त्वयुगपन्निष्क्रान्तावपि संभवतीति युगपन्निष्क्रान्तिसिद्धं तेष्व
विरोधात तस्याहेतुकत्वान्नानुपपन्नमिति पदकर्मप्रयोजनं तन्नयनपनस्यपदार्थत्वात मदितिद्वपेन्नरवेदि
देशेडपांचदेशेवासोमक्रयणमिमं क्रयदेशं प्रागवंशात्सोमक्रयणीयेनयत्र धृयुर्णीयमानायास्तस्याः
षट्पदान्यनुनिष्क्रामति अनुनिष्क्रमणं पदोपरि पदनिधानं यत्र सोमक्रयणीपदे निदधाति तत्रैवाध्व
र्युरपि पदं निदध्यादिति यावत् यर्हि पदाहविर्धाने हविर्धानात्प्रोक्षकरेतेन सप्तमपदेन यत्र सप्तमं पदं
निहितं तत्सांशुभिरितियावत अत्रेम त्वधृणमित्यर्थः इयोरितिषट्पदान्यनुनिष्क्रामतीति वाक्यावग
तस्य नयनस्य प्रयोजनाकांक्षायां संनिधानाद्वाक्यात श्रुतक्रयपदवत्सप्तमपदपांसूनां ग्रहणेपि विनियोगादे
शविशेषेकर्त्तव्य क्रयस्यनयनं विनानुपपत्त्यात तत्साध्यत्ववत् सप्तमपदपांसुग्रहणस्यापिनयनं विनानुप
पत्यात तत्साध्यत्वाविशेषादित्यर्थः वाक्येचाश्रयणादितिहेतुं दध्यानयनवै यस्यार्थत्वेनव्याकुर्वाणास्त
त एव संगतिं सूचयन् श्लोकं व्याचष्टे दध्यानयनमिति अत्रे संयुक्तमितिषट्पदान्यन्यनुनिष्क्रामतीति नय

सोम·४
१२

नपरवाक्येक्रयर्यांशग्रहणयोः द्वयोरप्यश्रवणादितिभावः नचसन्निधानस्यनयनसाधनत्वस्यचाविशेषेपि
ए=कहायन्याक्रीणातीतिस्तोयपा एकहायन्याः क्रयणार्थत्वात् संस्कारस्यापिनयनसाधनत्वस्यचाविशे
ष्यात्तद्वाराक्रयार्थत्वमेवांशस्यग्रहणार्थत्वमितिवाच्यंसप्तमंपदंग्रहातीत्युक्तेकस्यपदमित्यपेक्षायांप्रकृते
कहायन्याःपदेनान्वयावरूपभावादन्यथावाक्यस्यापरिसमाप्तत्तस्मादेकहायन्याङ्क्रयार्थत्वान्नयनमप्युप
पार्थमितिएवंपत्राशयमाह॥ अत्रेदमवधेयं प्रकृतेएकहायन्याःक्रयापोपात्तदर्थत्वान्त्वादेश
स्वरूपेणविनियोगात्वांशग्रहणार्थत्वसंभवेपिअरुणिमाधिकरणन्यायेनपुरोडाशकपालस्यतुषोपवाप
वत् पांशुग्रहणमेकहायन्याएवनप्रयोजकमिति कथंतद्वारानयनस्यप्रयोजकं।नचश्रावणोत्तरेतस्याः
सप्तमंपदमितिश्रवणान्तरंतस्याइत्यनेनएकहायन्याःपदांशादेकहायन्याःसप्तमपदग्रहणार्थत्वम
तिविनिगमनाविरहान्नयनस्यापिममप्रयोजकमेवेतिवाच्यं तत्रापिएकहायनीनस्वरूपेणप्रकृतार्किं
तुएकहायन्याक्रीणातीतिक्रयार्थत्वेनैवेतिपरप्रयुक्तेनैवनित्सोतापाएवंविनियोगइतिविनिगमनाविर
हासिद्धेनस्मादयंपूर्वपक्षोऽसंदइति क्रयार्थैवेतियासौक्रयार्थैकहायनीक्रयसिद्ध्यर्थंनीयमानेतस्याःसप्तमं राम०
पदंगृह्णातीतिक्रयार्थोयाएवैकहायन्याबुद्धौविपरिवर्तमानायाः अंशगात्वांशस्यग्रहणोपकारकर्तमात्रेण १२

वे
संबंधेपिसप्तमपदवाक्यस्यनिराकांक्षतयातदर्थत्वादकप्रमाणाभावात् । कपार्थैर्वैकहायनीनतुपदर्थांस्तुय
हार्णाविधेर्थः प्रयोजनंपूर्वंपक्षेसप्तमपदस्याविप्रवृत्तेपि तत्रासोमपचारेचपुनर्नयनंकार्यंसिद्धांतेतुपाक्षिकेतरे
णाक्रांतनयनंकर्तव्यं नचवाजिनयागवत्क्रांतनयनस्यसिद्धांतेलोपएवन्यायप्राप्तइतिकथंपाक्षिकेतरेणानुष्ठानमिति
वाच्यं वाजिनयागस्यपरप्रयुक्तद्रव्योपजीवित्वात्प्रयुक्तौलोपः । इहतुनद्रव्यंपरप्रयुक्तं किंतुपांसुत्वस्यद्रव्यस्य
यसंस्कारः तत्रैकहायन्याःसप्तमपदनिधानात्मकसएवपरप्रयुक्तः तथाचसंस्कारस्यपरप्रयुक्तस्यालाभे
पुनःसंस्कृतैरेवपांसुभिःक्रांतनयनंकर्तव्यमितिवैषम्यात् । अर्थाभिधानकर्मेवभविष्यतासंयोगस्यतन्निमित्ततया
वै दर्थोहिविधीयते पूर्वंषम्येणाप्रत्यवस्थानात्संगतिंसूचयन्पूर्वपक्षमाहैंद्रेति अन्यार्थत्वेनावगतस्यनि त
राकांक्षतयातुषोपवापान्वयायोगात् पुरोडाशपदमंतंसूचयन्पूर्वपक्षमाह त्रीकल्पकपालेनतुषानु
पवतीत्येवकपालमेवकेवलंतुषोपवापे विनियुज्यते एवंचकपालेनोपवपतिकपालेनश्रपयतीत्य
नयोस्तुल्यत्वादुभाभ्यामपिकपालंप्रयुज्यते तत्रप्रयोगदशायांलाघवादेकमेवोभाभ्यांप्रयुज्यते त
दशाप्राप्तपुरोडाशसंबंधानुवादकश्चपुरोडाशशब्दइतिभावः पुरोडाशपदमंतंत्रीकल्पकेवलंविधी
यतइत्ययमर्थः श्लोकेकेवलकपालशब्दस्यैवविधेयसमर्पकत्वेनकपालमात्रविधिस्यात्रत्वेवंसंभव

५ पुरोडाशार्थत्वरूपेण विनियोगाभावेपि पुरोडाशार्थत्वरूपमुख्यार्थसंबंधज्ञानानंतरं तदधिष्ठानस्थलत्वरूपेण तु उपवापे विनियोगः ५

सोम०४ तितथात्वेपुरोडाशपदस्यानिरर्थकानुवादनयानर्थक्यात्तस्मात्पुरोडाशकपालशब्देनसमुदायेनैवविधेयंसम
१८ र्पणीयं। तत्रपुरोडाशसंबंधित्वेनोद्देशेननिराकांक्षत्वात्तत्पात्र्यन्वयेसंबंधस्याभोगात्त्वेपिपुरोडाशकपालशब्दे
नपुरोडाशार्थत्वाधिष्ठानकपालस्वरूपेणलक्षयित्वान्यत्रविनियोगःक्रियते एवंचनकपालमात्रस्यवि
नियोगः किंतुपुरोडाशार्थत्वाधिष्ठानस्यैवकपालस्यतत्राधिष्ठानलक्षणयास्वरूपेणविनियोगात्
पुरोडाशार्थत्वरूपेणविनियोगात् सर्वमेवपुरोडाशार्थत्वज्ञानावध्यभावेनपुरोडाशप्रयुक्तमेवतूपोप
वापदृषज्जीवतिनतुस्वयंप्रयुक्तेप्रयुक्तस्यपुनःप्रयोगायोगादितिसिद्धांतमाह सत्यमिति ननुपुरोडाशा
र्थत्वसंबंधप्रयोगांतरेभूतमप्यादायलक्षणोपपत्तेरर्थसिद्धिरस्मिन्प्रयोगेतूपोपवापेनकपालप्रयुक्तिः किंच
नस्यादितिशंकायांवर्त्तमानसंबंधसंभवेभूतसंबंधोनन्याय्यः अग्निहोत्रहवण्याहवींषिनिर्वपतीत्यत्र
तुवर्त्तमानसंबंधाभावात्-आगत्याभूतसंबंधाश्रयणंनचपुरोडाशस्यभविष्यत्वात् संबंधस्यवर्त्तमानत्वंतवा
पिनसंभवतीतिवाच्यं पुरोडाशस्यभविष्यत्वेपिपात्रासादनकालएवपुरोडाशात्मकंप्रयोजनंमनसिनिधा
यतत्रिवंशीक्ष्यासंपादनादिनत्वादाद्यपरिस्पंदप्रभृतिफलनिष्पत्तिपर्यंतकालस्यवर्त्तमानकालत्वेन रा०
वर्त्तमानपुरोडाशार्थत्वसंबंधोपपत्तेरितिपरिहारंसूचयन्श्लोकंव्याचष्टे पुरोडाशार्थेनेतिअग्निहोत्रह १८

वशीवत्तद्वत्संवंधाश्रयत्वोप्यासादनस्यभूतलमात्रेणाभूतसंवंधोपपत्तेरितिदशमेवर्त्स्यमः प्रयोजनंतु
र्वपक्षेचहस्तस्यापिकपालंसंपाद्यतेनतुतुषोपवापःकर्त्तव्यः सिद्धांतेतुतुषोपवापस्यकपालप्रयोजकत्वाभावा
त्तेनकपालेनतुषोपवापः किंतुहस्तेननचात्रवात्तिनयागवहिर्त्वोपहंभवतिपुरोडाशकपालहस्तसाधन
विशेषाभावेपितुषोपलोपेपिमुख्यत्वस्यादितिन्यायेनहस्तेनसंभवत्तुषोपवापस्यलोपायोगादिति॥ स्वा
र्थेतु अर्थेनपुरोडाशलक्षणप्रयोजनेनसहाभिधीयमानंयत्पुरोडाशकपालादितत्साधनकंतुषोपवा
पादिकर्माप्यप्रयोजकंनचकथंकपालस्यपुरोडाशसंवंधस्तंप्रतितदभावादितिवाच्यं विद्यतापिपुरोडा
शेनतद्रुद्देशेनसादनमात्रात्संवंधोपपत्तेस्तस्यचलसंवंधस्यपुरोडाशनिमित्तकत्वात्तदर्थस्यैवसतःकपाल
स्यनतुषोपवापेविधानेनपुरोडाशाप्रयुक्तत्वात्तत्कपालस्येनिापप्रयंश्रावनालंभाद्वोहितशाकृतोरकर्मत्वंडभ
यत्रेतियथादध्यानयनस्यपयस्संवंधित्वेनअक्तत्वात्पयोहत्पामीक्षार्थत्वमेवंपशोर्हृदयादिश्रवणात्र
तन्मात्रार्थत्वमित्याशयः अनेनैवकपालपुरोडाशेश्रुतस्यतुषोपवापेविनीयोगाप्रयुक्तंपुरोडाशमात्र
प्रयुक्तत्वमिहत्वनुनत्वहृदयादिमात्रप्रयुक्तत्वंतत्संवंधित्वेनप्रयुक्तस्यश्रुतस्यान्यत्रविनियोगाभावोंतिप्र
त्यवस्थानात्संगतिरितिसूचितं ननुभयत्राश्रवणेपिएकहायनयनस्यपशोकेवलकपालेनपांसुग्रह

सोम॰ ४ १८ गार्थत्वं तद्वदिह किं न स्यादित्याशंक्य नयनस्योभयसंबंधित्वेन भ्रूश्रवणोपि एकहायन्याक्रीणानीतित्वा
त्प्या एकहायन्याक्रयार्थत्वान्नयनस्यापि तत्संस्कारकतया तादर्थ्ययुक्तं प्रकृते तु न तथा किंचित्क्रियात्म
कमस्ति किंतु त्वेपि तद्दर्भादेः प्रतिसंबंध्यपेक्षया सन्निदधानादग्नीषोमीयसौ वाक्यगतपशुसंबंध
इत्येतावन्मात्रेयस्य शरुस्त्रौहित्ययोरपि तुल्यमित्युभयार्थत्वमेवेत्याशयेनाह प्रकृतेति विप्रासनेति वि
प्रासनेन पशोर्नोपनीतस्येह विप्रायासंभवादिति भावः नन्वेवमपि तद्दयादिद्वारैव शरुस्त्रौहितद्वारा
पियागार्थत्वस्याद्वेवं च संप्रत्यध्वनं निरसनं च यागार्थत्वादेवतोद्देशेन त्यक्तस्य शरुस्त्रौहितस्य प्रतिपत्ति
रस्त्विति पत्तत्राह हविषीति तद्दयस्याग्नेरवयनीति हविःसंस्कारकावदानसंयोगात्तेषामेव हविस्त्व
मित्यर्थः नन्वेवं तर्हि तद्दयादिद्वारा यागार्थत्वे न स्युक्ते एवं पशुः स्यादिति शरुस्त्रौहित प्रयुक्तत्वशंकानव
काशात् किमर्थमिदमधिकरणमित्याशंक्याह शरुस्त्रौहितसंप्रत्यध्वननिरसनात्तकं कर्मार्थकर्म शरुस्त्रौ
हितयोः भूतभाव्युपयोगाभावेन प्रतिपत्तित्वासंभवात् ननु श्वतस्यापि प्राशित्रसंबंधित्वात् प्राशत्रपेन्तार्या
संनिहितपशोरेव तत्संबंधित्वेनान्वयात्तद्द्वारापि पशोर्यागसाधकत्वमवर्जनीयमेवेत्यत शरुस्त्रौहितस्येह राम॰
विप्राद्यभावेपि शरुस्त्रौहितकर्मणोर्थकर्मत्वेनतयाप्रयोजकत्वशंकायां भूतभाव्युपयोगाविधुरत्वेपि तद्दयाय १८

निष्पादितपाश्चात्याकीर्णकत्वेन प्रतिपत्त्यर्हत्वात्तत्शक्तुद्देशे स्वत्कर्मणः प्रतिपन्नत्वं ततश्च प्रयोजकत्वमित्येवं प्रतिपत्ति
त्वमुत्पादनार्थं हृदमधिकरणमित्याशयेनाह शक्तेति एवं च तत्तद्बोधपवापफलीकरणहोमवानिनयागादेः प्रति
पन्नत्वन्यायसाम्याद्दोहर्वानिनयागस्य तु प्रतिपन्नत्वविशेषतः समस्मिप्रतिपादयिष्यामः प्रयोजनेन एवं प्रते
त्युदयाद्यर्थविषयत्वस्य सकृदाद्यपवाचो तदर्थपश्वतं संपादासिद्धं तेतु लोपइति सूत्रार्थं प्रदर्शोपशु विषयेलो ल
हितशक्तैतो कर्मत्वमप्रयोजकत्वं तदर्थपश्वर्नत्वमादिति एकदेशद्रव्यं चोत्पन्नो विद्यमानसंयोगात् नन्वनो
केरस्त्वं दृष्टमस्मिन्प्रयोषे स्पृत्युक्तेस्सत एवेत्तोः स्वरः प्रतीयतेतद्द्रुतनश्यर्थशब्दाद्यपिप्रकृतस्यानुरार्थं प्रतीतेः पदे
कथं हविष्ट्वं तत्र प्रयुक्तिः अन्यथैकदेशद्रव्यमपि हविष्ट्वं स्यादिति शङ्कां निराकुर्वन्नपूर्वमाह नाग्नेति सर्वप्रदा
नाधिकरणोक्तरीत्या कृत्स्नपुरोडाशस्याग्नेयत्वागाघ्रातमानस्य तत्र स्वामित्वाभावेन तस्य देवतान्तरोद्देशेन त्यागा
योगात्तदर्थपुरोडाशांतसंपादनस्यैन्द्राग्नत्वाभावात् कृष्णषष्ठ्यादौ तु देवतान्तरसंगत्यभावात् प्रकृतग्रहणानर्ह
त्वाति नन्वपुरोडाशांतरग्रहणोपि बाधितकृतैव प्रतीतिः शेषविशिष्टे विरोध आज्येन शेषं संपादयतीति अत्रक
र्मान्तर स्वष्टकृदङ्गस्य पुरोडाशांतरेणुपपन्नेति भावः अनेनैव पूर्वं तु तदथ्याद्यर्थस्य पशोः सकृद्धोहितत्व
हणासंभवान्नस्य प्रयोजकत्वेपि हविष्कृतपुरोडाशोन्नरार्थग्रहणासंभवात्तद्विकृतः प्रयोजकत्वमिति प्रत्यव

सोम·४
१०

स्यानात्संगतिरितिसूचितं यदि प्रकृतसंबंधमनपेक्ष्यैव तन्त्रणार्थादितिवाक्यंस्वार्थबोधनक्षमं स्यात्तदा ह्यन्तरप्रयो
जकत्वं स्यात् नत्वेतदस्ति तन्त्रणार्थं प्राकृतस्य सापेक्षतया अस्यो तन्त्रणार्थादिति संबंधाज्ञानेवाक्यार्थबोधाय यैवमाना
देवं च कस्मिन्नपेक्षायां संनिहितानेयस्मिन्नेवमुक्तन्त्रणार्थं वाक्यं प्रवृत्तं कृतसंबद्धतन्त्रणार्थमेवालंबतइति नपुरोडाशा
तरप्रयुक्तेरवकाशइति सिद्धं तपति तन्त्रणादित्यधानामिति स्ववाक्यइतियदिपुरोडाशस्यैतन्त्रणार्थादिति,
श्रूयेत तदानेरपेक्ष्यस्यात्त्वेतदस्तीत्यर्थः त्वेतरक्तस्यापिदेवताख्यत्वाभावात्पुनः स्वीकृतं देवतातरार्थं त्यागसं
भवति नचतस्यकस्यपुनः स्वीकारे आचारविरोधः प्रत्यक्षश्रुत्या आचारबाधनादित्याशयवानाह अन्यार्थ
स्यापीति विद्यमानशेषस्य प्रत्यपेक्षत्वाद् अपि प्रकृतसंबंध एवन्यायइत्याशयेनाह प्रतिपत्तित्वादिति सू
त्रार्थस्तु एकदेशद्रव्यं किंचित्पुरोडाशादिकमस्य प्रयोजनंकर्मोत्पत्तिरदृष्टार्थं वा विद्यमानेनाग्नेयपुरोडाशावि मे
नासंबंधादिति अभिघारणे विप्रकर्षादनुयाजवत्स्यात्तत्रभेदः स्यात् केतुपशुवइति आग्नेयैकदेशः द्यवइत्यर्थः
तंत्रेणोपक्रमेतदानीमेवालंभनीयत्वाद्विचारानुपपत्तिमाशंक्यालंभोत्कर्षेप्यतस्यापिसद्भावात्तत्र्यपवि
चारइत्याह पर्यग्निरिति प्रकृताविनिर्दिष्टैः एतौ मासस्योरित्यर्थः प्राप्तमिति स्वीरकपर्यग्नियेति भावः प्राप्तमि एम०
ति आज्यभागादावितिशेषः कृतेतिकृतत्वधारयितव्यइतिपात्रीतंत्रेणोत्कर्षमित्यर्थः तदर्थाचेति अयमेव १०

वाधिकरणांशसंशयः एवंस्तुफलसंशयः तत्संशयकोटिद्वयस्यं तत्र साधारं दोषपूर्वोत्तरपक्षफलत्वेनलेखनादि
ति ध्येयं ननु हविःसंस्कारकत्वेपि पुरोडाशकपालवत्स्यरकीप रूब्योपपत्तीवनादभिधानेरणांनप्रयोजकमित्यतः
३ पूर्वपक्षे फलफलिभावेत्यादयति संस्कारद्वति पराप्रयुक्तरूब्योपपत्तीवनादृत्यप्रयोजकत्वाभावेपि सिनद्वारण
प्रयोजकत्वमस्त्येवधारणं विनासंस्कारासंभवादत एव प्राणितानयनकालेयद्वाजसनेपि भिराम्नानंतुषनि
रसनंतत्पुरोडाशकपालोपादानस्याप्रयोजकमपितत्पालनस्यप्रयोजकमेवेतिभावः ननुप्रतिपत्तित्वेपिधार
